# Vishnuproktam Shivaradhanamahimavarnanam

# વિષ્ણુપ્રોક્તં શિવારાધનમહિમાવર્ણનમ્

## Document Information

Text title : Vishnuproktam Shivaradhanamahimavarnanam

File name : viShNuproktaMshivArAdhanamahimAvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 25| 161-203.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# વિષ્ણુપ્રોક્તં શિવારાધનમહિમાવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
વિષ્ણુઃ (ઉવાચ)
તાવત્સ્થાસ્યન્તિ દુઃખાનિ યાવન્નારાધ્યતે શિવઃ ।
તાવદેવ મહાવ્યાધિઃ યાવન્નારાધ્યતે શિવઃ ॥ ૧૬૧॥

તાવત્તિષ્ઠન્તિ પાપાનિ યાવન્નારાધ્યતે શિવઃ ।
તાવદ્ભવતિ દારિદ્ર્યં યાવન્નારાધ્યતે શિવઃ ॥ ૧૬૨॥

યથા સૂર્યોદયે જાતે વિનશ્યતિ તમસ્તથા ।
પૂજિતે શ્રીમહાદેવે દુઃખમાત્રં વિનશ્યતિ ॥ ૧૬૩॥

નાનાદુઃખમહાવ્યાધિભેષજં શિવપૂજનમ્ ।
સત્યં સત્યં પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૧૬૪॥

નાનાસંસારદુઃખાનિ નશ્યન્તિ શિવપૂજયા ।
સત્યં સત્યમિતિ પ્રાહ જાબાલોઽપિ સ્વયં વિધે ॥ ૧૬૫॥

સંસારજાં રુજં રુદ્રો દ્રાવયત્યર્ચિતઃ સદા ।
તતોઽર્ચનીયમનિશં રુદ્રલિઙ્ગં મુમુક્ષુભિઃ ॥ ૧૬૬॥

સર્વમન્યત્પરિત્યજ્ય શિવ એવ શિવઙ્કરઃ ।
ધ્યેય ઇત્યાહ હિ વિધે સાક્ષાદાથર્વણશ્રુતિઃ ॥ ૧૬૭॥

પૂજનીયો મહારુદ્રો મનોવાક્કાયકર્મભિઃ ।
તત્પૂજયૈવ નશ્યન્તિ દુઃખાનિ વિવિધાન્યપિ ॥ ૧૬૮॥

વિનાશયતિ સંસારં સકૃત્સમ્પૂજનાચ્છિવઃ ।
ભાવપૂતં મહાદેવં યોઽર્ચયિષ્યતિ સન્તતમ્ ॥ ૧૬૯॥

સ સમ્પ્રાપ્નોતિ ધર્માર્થકામમોક્ષાન્ન સંશયઃ ।
સંસારસાગરં ઘોરં યઃ સમુત્તર્તુમિચ્છતિ ॥ ૧૭૦॥

તેન નિત્યં મહાદેવઃ પૂજનીયઃ પ્રયત્નતઃ ।
ધન્યોઽસાવિતિ વિજ્ઞેય યોઽન્વહં પૂજયેચ્છિવમ્ ॥ ૧૭૧॥

સ તરત્યેવ સંસારં નાનાપાતકસાગરમ્ ।
શિવેતિ નામદાવાગ્નિર્મહાપાપવનાન્યપિ ॥ ૧૭૨॥

ભસ્મસાત્કુરુતે સદ્યઃ સત્યં સત્યં ન સંશયઃ ।
પાપમૂલાનિ દુઃખાનિ વિવિધાન્યપિ તાન્યતઃ ॥ ૧૭૩॥

શિવાર્ચનેન નાશ્યાનિ પાપાનિ નિખિલન્યપિ ।
પાતકાનિ નિવર્તન્તે યાવન્તિ શિવપૂજયા ॥ ૧૭૪॥

કતું તાવન્તિ પાપાનિ ન શક્નોતિ નરઃ ક્વચિત્ ।
સંસારમૂલભૂતાનાં પાતકાનાં ચતુર્મુખ ॥ ૧૭૫॥

શિવનામકુઠોરણ વિનાશો જાયતે ધ્રુવમ ।
શિવનામામૃતં પેયં પાપચણ્ડાંશુતાપિતૈઃ ॥ ૧૭૬॥

પાપદાવાગ્નિતપ્તાનામસ્તિ નાન્યત્પરાયણમ્ ।
શિવેતિ નામપીયૂષવર્ષધારાપરિપ્લુતાઃ ॥ ૧૭૭॥

સંસારદાવમધ્યેઽપિ ન શોચન્તિ ન સંશયઃ ।
યેષાં ધર્મસ્વભાવાનાં મહેશઃ કુલદૈવતમ્ ॥ ૧૭૮॥

તે ધન્યાસ્તે મમારાધ્યાસ્તે મહેશકૃપાશ્રયાઃ ।
ન ભક્તિઃ શઙ્કરે પૂજા રાગદ્વેષરતાત્મનામ્ ॥ ૧૭૯॥

અનન્તજન્મભિર્યેન તપસ્તપ્તં ભવિષ્યતિ ।
તદ્વિધાનાં ન સહસા મુક્તિર્ભવતિ સર્વથા ॥ ૧૮૦॥

તસ્યૈવ ભક્તિર્ભવતિ ભવાનીપ્રાણવલ્લભે ।
જાતાપિ શઙ્કરે ભક્તિરન્યસાધારણી વૃથા ॥ ૧૮૧॥

પરન્ત્વવ્યભિચારેણ શિવભક્તિઃ પરેપ્સિતા ।
યસ્યાસ્ત્યામરણં શમ્ભૌ ભક્તિરવ્યભિચારિણી ॥ ૧૮૨॥

તસ્યૈવ મોક્ષઃ સુલભો નાન્યસ્યેતિ મતિર્મમ ।
વિધે ભવન્તિ પ્રત્યૂહાઃ શિવભક્તિવિધાતકાઃ ॥ ૧૮૩॥

પ્રત્યૂહાસ્તે શમં યાન્તિ મહેશાનુગ્રહાત્પરાત્ ।
યસ્ય ભક્તિરનુસ્યૂતા દેહપાતાન્તમીશ્વરે ॥ ૧૮૪॥

સ શિવાન્યગૃહીતાત્મા ન ભવત્યેવ તાદૃશઃ ।
યસ્ય ભક્તિર્મહાદેવે ધારારૂપાઽનુવર્તતે ॥ ૧૮૫॥

નમસ્તસ્મૈ સવંશાય સમિત્રાય ચતુર્મુખ ।
શિવૌ પૂજ્યૌ યથા નિત્યં તથા પૂજ્યઃ શિવાર્ચકઃ ॥ ૧૮૬॥

શિવાર્ચકઃ શિવૌ ચેતિ ત્રયઃ પૂજ્યા મમાન્વહમ્ ।
અનેકજન્મતપસા પૂતઃ પુણ્યૌઘસંશ્રયઃ ॥ ૧૮૭॥

મહાદેવપરો ભૂત્વા યજતિ શ્રીમહેશ્વરમ્ ।
યસ્ય શ્રીમન્મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૧૮૮॥

તસ્ય હૃત્કમલે(લં) સામ્બઃ સર્વદાપ્યધિતિષ્ઠતિ ।
સામ્વસ્ય શ્રી મહેશસ્ય સન્નિધિર્યત્ર સર્વદા ॥ ૧૮૯॥

ન તસ્ય પાપલેશોઽસ્તિ સત્યં સત્યં ન સંશયઃ ।
સર્વત્ર વિદ્યમાનોઽપિ શિવભક્તહૃદમ્બુજે ॥ ૧૯૦॥

લિઙ્ગરૂપં સમાશ્રિત્ય ક્રીડાલોલોઽધિતિષ્ઠતિ ।
ઊધસ્યેવ યથા ક્ષીરં પશુસંર્વાઙ્ગસઙ્ગતમ્ ॥ ૧૯૧॥

શિવઃ સર્વવ્યાપકોઽપિ શિવલિઙ્ગમધિશ્રિતઃ ।
અતઃ સર્વં પરિત્યજ્ય શિવલિઙ્ગં પ્રયત્નતઃ ॥ ૧૯૨॥

પૂજનીયં વિધે નિત્યં વિધિવદ્ભક્તિપૂર્વકમ્ ।
શિવલિઙ્ગે શિવઃ પૂજ્યો નાન્યત્ર તુ કદાચન ॥ ૧૯૩॥

ક્ષીરલબ્ધિર્ન યથા વિષાણાદૌ સ્તનં વિના ।
શિવલિઙ્ગં વિના તદ્વચ્છિવો નાન્યત્ર પૂજ્યતે ॥ ૧૯૪॥

શિવપૂજા બહુવિધા કથ્યતે નિગમૈર્વિધે ।
આગમૈરપિ સા પુજા વિવિધૈવેતિ કથ્યતે ॥ ૧૯૫॥

ષોડશૈરુપચારૈશ્ચ (ઉપચારૈઃ ષોડશભિઃ)
પૂજનીયોઽન્વહં શિવઃ ।
તેષુ મન્ત્રાશ્ચ વિવિધા નિગમાગમચોદિતાઃ ॥ ૧૯૬॥

મન્ત્રાઃ શિવપરાઃ સર્વનિગગાગમચોદિતાઃ ।
સમ્યજ્જ્ઞાતું ન શક્યયન્તે વિવિધા બહવો યતઃ ॥ ૧૯૭॥

તથાપિ તેષુ મન્ત્રેષુ શિવપઞ્ચાક્ષરઃ પરઃ ।
તેન મન્ત્રેણ વિશ્વેશઃ પૂજનીયઃ પ્રયત્નતઃ ॥ ૧૯૮॥

શિવપઞ્ચાક્ષરો મન્ત્રઃ સર્વમન્ત્રોત્તમોત્તમઃ ।
ન તસ્માદધિકો મન્ત્રો વૈદિકોઽન્યત્ર દૃશ્યતે ॥ ૧૯૯॥

શિવપઞ્ચાક્ષરો મન્ત્રો વૈદિકો વેદસમ્મતઃ ।
વેદેષુ પઠ્યતે તદ્વદ્વેદાન્તેષુ ચ પઠ્યતે ॥

ઋષિભિઃ સંસ્કૃતો મન્ત્રઃ શિવમન્ત્રો મુમુક્ષુભિઃ ।
શિવેનાપિ સ્તુતો મન્ત્રઃ શિવમન્ત્રઃ શિવપ્રદઃ ॥

શ્રીરુદ્રમન્ત્રમધ્યસ્થઃ શૈવઃ પઞ્ચાક્ષરો મનુઃ ।
વેદાવતંસો મન્ત્રોઽયં શિવપઞ્ચાક્ષર સ્તુતઃ ॥

તેન મન્ત્રેણ કર્તવ્યં શિવલિઙ્ગાર્ચનં બુધૈઃ ।
શ્રીમત્પઞ્ચાક્ષરો મન્ત્રઃ સર્વાઘૌવવિનાશકઃ ॥

સ્મૃતેઽપિ પાપગિરયો ભવન્ત્યેવ હિ ભસ્મસાત્ ।

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુપ્રોક્તં શિવારાધનમહિમાવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૫। ૧૬૧-૨૦૩.૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 25 . 161-203.1..

Proofread by Ruma Dewan

*Vishnuproktam Shivaradhanamahimavarnanam*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*